# Shri Dakshinamurti Ashtottarashatanamavalih

# श्रीदक्षिणामूर्त्यष्टोत्तरशतनामावलिः

## Document Information


Text title : dakShiNAmUrtyaShTottarashatanAmAvalI 2

File name : dakShiNAmUrtyaShTottarashatanAmAvalI.itx

Category : shiva, aShTottarashatanAmAvalI

Location : doc_shiva

Author : The Samvat Master, Iswarananda Giriji, Mount Abu

Proofread by : Sunder Hattangadi NA

Description/comments : See corresponding stotram

Source : Shri Chitrapura Stuti Manjari,3rd ed. 2008

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : June 27, 2019

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


January 22, 2022

*sanskritdocuments.org*

# श्रीदक्षिणामूर्त्यष्टोत्तरशतनामावलिः

श्रीमेधादक्षिणामूर्त्यष्टोत्तरशतनामावलिः
मूलमन्त्रवर्णाद्यात्मका
ॐ ओङ्काराचलसिंहेन्द्राय नमः । ओङ्कारसिंहसर्वेन्द्राय
ॐ ओङ्कारोद्यानकोकिलाय नमः ।
ॐ ओङ्कारनीडशुकराजे नमः ।
ॐ ओङ्कारारण्यकुञ्जराय नमः ।
ॐ नगराजसुताजानतनये नमः ।
ॐ नगराजनिजालयाय नमः ।
ॐ नवमाणिक्यमालाढ्याय नमः ।
ॐ नवचन्द्रशिखामणये नमः ।
ॐ नन्दिताशेषमौनीन्द्राय नमः ।
ॐ नन्दीशादिमदेशिकाय नमः । (१०)
ॐ मोहानलसुधाधाराय नमः । मोहानलसुधासाराय
ॐ मोहाम्बुजसुधाकराय नमः ।
ॐ मोहान्धकारतरणये नमः ।
ॐ मोहोत्पलनभोमणये नमः ।
ॐ भक्तज्ञानाब्धिशीतांशवे नमः ।
ॐ भक्ताज्ञानतृणानलाय नमः ।
ॐ भक्ताम्भोजसहस्रांशवे नमः ।
ॐ भक्तकेकिघनाघनाय नमः ।
ॐ भक्तकैरवराकेन्दवे नमः ।
ॐ भक्तकोकदिवाकराय नमः । (२०)
ॐ गजाननादिसम्पूज्याय नमः ।
ॐ गजचर्मोज्ज्वलाकृतये नमः ।
ॐ गङ्गाधवलदिव्याङ्गाय नमः ।

ॐ गङ्गाभङ्गलसज्जटाय नमः ।
ॐ गगनाम्बरसंवीताय नमः ।
ॐ गगनामुक्तमूर्धजाय नमः ।
ॐ वदनाब्जजिताब्जश्रिये नमः ।
ॐ वदनेन्दुस्फुरद्दिशाय नमः ।
ॐ वरदानैकनिपुणाय नमः ।
ॐ वरवीणोज्ज्वलत्कराय नमः । (३०)
ॐ वनवाससमुल्लासिने नमः ।
ॐ वनलीलैकलोलुपाय नमः । वनवीरैकलोलुपाय
ॐ तेजःपुञ्जघनाकाराय नमः ।
ॐ तेजसामविभासकाय नमः ।
ॐ विधेयानां तेजःप्रदाय नमः ।
ॐ तेजोमयनिजाश्रमाय नमः ।
ॐ दमितानङ्गसङ्ग्रामाय नमः ।
ॐ दरहासोज्ज्वलन्मुकाय नामः । दरहासजिताङ्गनाय
ॐ दयारससुधासिन्धवे नमः ।
ॐ दरिद्रधनशेवधये नमः । (४०)
ॐ क्षीरेन्दुस्फटिकाकाराय नमः ।
ॐ क्षीतीन्द्रमुकुटोज्ज्वलाय नमः । क्षीरेन्दुमुकुटोज्ज्वलाय
ॐ क्षीरोपहाररसिकाय नमः ।
ॐ क्षिप्रैश्वर्यफलप्रदाय नमः ।
ॐ नानाभरणमुक्ताङ्गाय नमः । नानाभरणमुग्धाङ्गाय
ॐ नारीसम्मोहनाकृतये नमः ।
ॐ नादब्रह्मरसास्वादिने नमः ।
ॐ नागभूषणभूषिताय नमः ।
ॐ मूर्तिनिन्दितकन्दर्पाय नमः ।
ॐ मूर्तामूर्तजगद्वपुषे नमः । (५०)
ॐ मूकाज्ञानतमोभानवे नमः । मूलाज्ञानतमोभानवे
ॐ मूर्तिमत्कल्पपादपाय नमः ।
ॐ तरुणादित्यसङ्काशाय नमः ।
ॐ तन्त्रीवादनतत्पराय नमः ।
ॐ तरुमूलैकनिलयाय नमः ।

ॐ तप्तजाम्बूनदप्रभाय नमः ।
ॐ तत्त्वपुस्तोल्लसत्पाणये नमः ।
ॐ तपनोडुपलोचनाय नमः ।
ॐ यमसन्नुतसङ्कीर्तये नमः ।
ॐ यमसंयमसंयुताय नमः । (६०)
ॐ यतिरूपधराय नमः ।
ॐ मौनमुईन्द्रोपास्यविग्रहाय नमः ।
ॐ मन्दारहाररुचिराय नमः ।
ॐ मदनायुतसुन्दराय नमः ।
ॐ मन्दस्मितलसद्वक्त्राय नमः ।
ॐ मधुराधरपल्लवाय नमः ।
ॐ मञ्जीरमञ्जुपादाब्जाय नमः ।
ॐ मणिपट्टोल्लसत्कटये नमः ।
ॐ हस्ताङ्कुरितचिन्मुद्राय नमः ।
ॐ हंसयोगपटूत्तमाय नमः । (७०) हठयोगपरोत्तमाय
ॐ हंसजप्याक्षमालाढ्याय नमः ।
ॐ हंसेन्द्राराध्यपादुकाय नमः ।
ॐ मेरुशृङ्गसमुल्लासिने नमः । मेरुशृङ्गतटोल्लासाय
ॐ मेघश्याममनोहराय नमः ।
ॐ मेघाङ्कुरालवालाग्र्याय नमः ।
ॐ मेधापक्वफलद्रुमाय नमः ।
ॐ धार्मिकान्तकृतावासाय नमः । धार्मिकान्तर्गुहावासाय
ॐ धर्ममार्गप्रवर्तकाय नमः ।
ॐ धामत्रयनिजारामाय नमः ।
ॐ धरोत्तमहारथाय नमः । (८०) धर्मोत्तममनोरथाय
ॐ प्रबोधोदारदीपश्रिये नमः । प्रबोधोद्गारदीपश्रिये
ॐ प्रकाशितजगत्त्रयाय नमः ।
ॐ प्रज्ञाचन्द्रशिलाचन्द्राय नमः ।
ॐ प्रज्ञामणिलसत्कराय नमः । प्रज्ञामणिवराकराय
ॐ ज्ञानिहृद्भासमात्मने नमः । ज्ञानान्तरभासात्मने
ॐ ज्ञातृणामविदूरगाय नमः । ज्ञातृज्ञादिविदूरगाय
ॐ ज्ञानायाद्द्वतदिव्याङ्गाय नमः । ज्ञानाद्वैतदिव्याङ्गाय

ॐ ज्ञातिजातिकुलागताय नमः । ज्ञातृज्ञातिकुलागताय
ॐ प्रपन्नपारिजाताग्र्याय नमः । प्रपन्नपारिजाताश्रयाय
ॐ प्रणतार्त्यब्धिवाडवाय नमः । (९०)
ॐ भूतानां प्रमाणभूताय नमः ।
ॐ प्रपञ्चहितकारकाय नमः ।
ॐ यमिसत्तमसंसेव्याय नमः । यत्तत्त्वमसिसंवेद्याय
ॐ यक्षगेयात्मवैभवाय नमः । यज्ञगेयात्मवैभवाय
ॐ यज्ञाधिदेवतामूर्तये नमः । यज्ञादिदेवतामूर्तये
ॐ यजमानवपुर्धराय नमः ।
ॐ छत्राधिपदिगीशाय नमः । छत्राधिपतिविश्वेशाय
ॐ छत्रचामरसेविताय नमः ।
ॐ छन्दश्शास्त्रादिनिपुणाय नमः ।
ॐ छलजात्यादिदूरगाय नमः । (१००)
ॐ स्वाभाविकसुखैकात्मने नमः ।
ॐ स्वानुभूतिरसोदधये नमः ।
ॐ स्वाराज्यदम्पदध्यक्षाय नमः । स्वाराज्यजटजूटाय
ॐ स्वात्माराकमहामतये नमः ।
ॐ हाटकाभजटाजूटाय नमः ।
ॐ हासोदस्तारिमण्डलाय नमः ।
ॐ हालाहलोज्ज्वलगलाय नमः ।
ॐ हारायितभुजङ्गमाय नमः । (१०८) । हार्दग्रन्थिविमोचकाय

इति श्रीमेधादक्षिणामूर्तिमनुवर्णाद्यादिमा
अष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by Sunder Hattangadi, NA

*Shri Dakshinamurti Ashtottarashatanamavalih*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*